Shri Raghunatha Temple MSS. Library,
JAMMU

No. ६८८ . घ

Title सौन्दर्यलहरी

Author श्रीमच्छंकराचार्यः

Extent ११ Age

Subject चक्तिशास्त्रम् · सम्पूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२२ ७-१२ दि

नं० ६८७-ध

सौन्दर्यलहरी (भक्तिशास्त्रम्)

पत्राणि ११ (सम्पूर्णम्)

नं० ९८७-ध

कर्त्ता श्रीमच्छंकराचार्य:

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

326 C

सौं॰ १

ॐ श्रीगणेशाय नमः ॥ ॐ नमः त्रिपुरसुंदर्यै ॥ ॐ शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं ॥ न चेदेवं देवो न खलु
कुशलः स्पंदितुमपि ॥ अतस्त्वामाराध्यं हरिहरविरिंच्यादिभिरपि ॥ प्रणंतुं स्तोतुं वा कथमकृतपुण्यः प्रभवति ॥ १ ॥
तनीयांसं पांशुं तव चरणपंकेरुहभवं ॥ विरिंचिः संचिन्वन्विरचयति लोकानविकलं ॥ वहत्येनं शौरिः क-
थमपि सहस्रेण शिरसां ॥ हरः संक्षुद्यैनं भजति भसितोद्धूलनविधिं ॥ २ ॥ अविद्यानामंतस्तिमिरमिहिरद्वी-
पनगरी ॥ जडानां चैतन्यस्तबकमकरंदश्रुतिझरी ॥ दरिद्राणां चिंतामणिगुणनिका जन्मजलधौ ॥ निमग्ना-
नां दंष्ट्रा मुररिपुवराहस्य भवती ॥ ३ ॥ त्वदन्यः पाणिभ्यामभयवरदो दैवतगणः ॥ त्वमेका नैवासि प्रकटित-
वराभीत्यभिनया ॥ भयात्त्रातुं दातुं फलमपि च वांछासमधिकं ॥ शरण्ये लोकानां तव हि चरणावेव निपुणौ ॥ ४ ॥
हरिस्त्वामाराध्य प्रणतजनसौभाग्यजननीं ॥ पुरा नारी भूत्वा पुररिपुमपि क्षोभमनयत् ॥ स्मरोपि त्वां नत्वा
रतिनयनलेह्येन वपुषा ॥ मुनीनामप्यंतः प्रभवति हि मोहाय महतां ॥ ५ ॥ धनुः पौष्पं मौर्वी मधुकरमयी

सौं॰ १

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पंचविशिखा ॥ वसंतः सामंतो मलयमरुदायोधनरथः ॥ तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपा ॥
मपांगात्ते लब्ध्वा जगदिदमनंगो विजयते ॥ ६ ॥ क्वणत्कांचीदामा करिकलभकुंभस्तननता ॥ परिक्षीणा मध्ये
परिणतशरच्चंद्रवदना ॥ धनुर्बाणान्पाशं सृणिमपि दधाना करतले ॥ पुरस्तादास्तां नः पुरमथितुरा
होपुरुषिका ॥ ७ ॥ सुधासिंधोर्मध्ये सुरविटपिवाटीपरिवृते ॥ मणिद्वीपे नीपोपवनवति चिंतामणिगृ
हे ॥ शिवाकारे मंचे परमशिवपर्यंकनिलयां ॥ भजंति त्वां धन्याः कतिचिच्चिदानंदलहरीं ॥ ८ ॥ महीं मू
लाधारे कमपि मणिपूरे हुतवहं ॥ स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि ॥ मनोपि भ्रूमध्ये सक
लमपि भित्त्वा कुलपथं ॥ सहस्रारे पद्मे सह रहसि पत्या विहरसि ॥ ९ ॥ सुधाधारासारैश्चरणयुगलांत
र्विगलितैः ॥ प्रपंचं सिंचंती पुनरपि रसाम्नायमहसः ॥ अवाप्य स्वां भूमिं भुजगनिभमध्युष्टवलयं ॥
स्वमात्मानं कृत्वा स्वपिषि कुलकुंडे कुहरिणि ॥ १० ॥ चतुर्भिः श्रीकंठैः शिवयुवतिभिः पंचभिरपि ॥ प्रभि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सौं २

गीर्भिः शंभोर्नवभिरपि मूलप्रकृतिभिः ॥ त्रयश्चत्वारिंशद्वसुदलकलाश्रत्रिवलयं ॥ त्रिरेखाभिः सार्द्धं तव भवन

कोणाः परिणताः ॥ ११ ॥ त्वदीयं सौंदर्यं तुहिनगिरिकन्ये तुलयितुं ॥ कवींद्राः कल्पंते कथमपि विरिंचिप्रभृतयः ॥

यदालोकौत्सुक्यादमरललना यांति मनसा ॥ तपोभिर्दुःप्राप्यामपि गिरिशसायुज्यपदवीं ॥ १२ ॥ नरं वर्षीयांसं

नयनविरसं नर्मसु जडं ॥ तवापांगालोके पतितमनुधावंति शतशः ॥ गलद्वेणीबंधाः कुचकलशविस्रस्त

सिचया ॥ हठात्त्रुट्यत्कांच्यो विगलितदुकूला युवतयः ॥ १३ ॥ क्षितौ षट्पंचाशद्द्विसमधिकपंचाशदुदके ॥

हुताशे द्वाषष्टिश्चतुरधिकपंचाशदनिले ॥ दिवि द्विःषट्त्रिंशन्मनसि च चतुःषष्टिरिति ये ॥ मयूखास्तेषाम

प्युपरि तव पादांबुजयुगं ॥ १४ ॥ शरज्ज्योत्स्नाशुभ्रां शशियुतजटाजूटमुकुटां ॥ वरत्रासत्राणस्फटिकघुटि

कापुस्तककरां ॥ सकृन्नत्वा नत्वा कथमिव सतां सन्निदधते ॥ मधुक्षीरद्राक्षामधुरिमधुरीणा भणितयः ॥ १५ ॥

कवींद्राणां चेतःकमलवनबालातपरुचिं ॥ भजंते ये संतः कतिचिदरुणामेव भवतीं ॥ विरिंचिप्रेयस्या

ई २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्तरुणतरशृंगारलहरी॥ गभीराभिर्वाग्भिर्विदधति सतां रंजनममी॥ १६॥ सवित्रीभिर्वाचां शशिमणिशिलाभं
गरुचिभिर्वशिन्याद्याभिस्त्वां सह जननि संचिंतयति यः॥ स कर्ता काव्यानां भवति महतां भंगिरुचिभिर्वचोभि
र्वाग्देवीवदनकमलामोदमधुरैः॥ १७॥ तनुच्छायाभिस्ते तरुणतरणिश्रीसरणिभिः॥ दिवं सर्वामुर्वीमरुणिमनि
मग्नां स्मरति यः॥ भवंत्यस्य त्रस्यद्वनहरिणशालीननयनाः॥ सहोर्वश्या वश्याः कति कति न गीर्वाणगणिकाः॥ १८॥
मुखं बिंदुं कृत्वा कुचयुगमधस्तस्य तदधो॥ हरार्धं ध्यायेद्यो हरमहिषि ते मन्मथकलां॥ स सद्यः संक्षोभं नयति व
निता इत्यतिलघु॥ त्रिलोकीमप्याशु भ्रमयति रवींदुस्तनयुगां॥ १९॥ किरंतीमंगेभ्यः किरणनिकुरुंबामृतर
सं॥ हृदि त्वामाधत्ते हिमकरशिलामूर्तिमिव यः॥ स सर्पाणां दर्पं शमयति शकुंताधिप इव॥ ज्वरप्लुष्टं दृष्ट्या
सुखयति सुधाधारसिरया॥ २०॥ तडिल्लेखातन्वीं तपनशशिवैश्वानरमयीं॥ निषण्णां षण्णामप्युपरि कमलानां
तव कलां॥ महापद्माटव्यां मृदितमलमायेन मनसा॥ महांतः पश्यंतो दधति परमाह्लादलहरीं॥ २१॥ भवानि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मो॰ २ त्वं हा सेमयि विततहर्षिंसकमला॥ मिति लोकं बोद्धुं नकथ्ययतिभवान्निव मितिय॥ मदैवत्वं नसैदिविभिनिजमायुअपयद
वी॥ मउंदवसेंदस्फुटमुकुटकीराजितपदो॥ २२॥ त्वया हृत्वा वामं वपुरपरितृप्तेन मनसा॥ शरीरार्धं शंभो रवपरमपिवं
के हृतमभूत्॥ तथा हि त्वद्रूपं सकलमतमाभं त्रिनयनं॥ जटाभाभास्वन्मृद्रु जटिलशशिचूडालमकुटं॥ २३॥ जगद्भूते
धातादपिवतिरुद्र स्थापयति॥ तिरस्कुर्वंते नक्षममपि वपुर्यीशातिरयति॥ सदा सर्वः सर्वं तदिदमनुगृह्णाति च शिव
स्तवाज्ञामालंब्यक्षणचकितयोर्भ्रूलतिकयोः॥ २४॥ त्वया स्तां देवानां त्रिगुणजनितानां तव शिवे॥ भवेत्पूजा पूजा॥
तव चरणयोर्या विरचिता॥ तथा हि त्वत्पादोद्वहनमणिपीठस्य निकटे॥ स्थिता ह्येते योगा मुकुलितकरोत्तंसमुकुटाः॥ २५॥
विरिंचिः पंचत्वं व्रजति हरिराप्नोति विरतिं॥ विनाशं कीनाशो भजति धनदो याति निधनं॥ वितन्द्रा माहेंद्री विततिरपि
संमीलितदृशा महासंहारे स्मिन्विलसति सतित्वत्पति रसौ॥ २६॥ जपो जल्पः शिल्पं सकलमपि मुद्राविरचना॥
गतिः प्रादक्षिण्यं भ्रमणमशनाद्याहुतिविधिः॥ प्रणामः संवेशः सुखमखिलमात्मार्पणदृशा॥ सपर्यापर्याय उ॰ २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्तव भवतयन्मेविलसितं ॥२३॥ ददाने दीने भव न्त्विय मनिशामीशान महश्री ॥ मम मंदं मौदंय्येस्तव कमकवंदं ।
विकिरति ॥ नवास्मिन्नंदार सवकमस भगेयानपवणे ॥ किमन्नन्मजीवः करणाचरणोबद्धचरणांतो ॥२५॥ ह
धामप्पा स्याध्यप्रतिभयमनामत्तु दुरितानि ॥ विपद्येते विश्वे विधिशान मसवाघादि विषदः कतालेयत्वेडंकव
लितवतः कालकलना ॥ नवंभोभन्महल्लेन वज्जन नितांठकम हिमा ॥२६॥ किरीटं वैविच्यपविदरपुरःकैटभभि
दः ॥ कटोवे कोटीवेस्तवल मिजदहिडंमारि सकुटं ॥ प्रणम्येवेतेसुमस भमभिसंधाय भवतं ॥ भवस्याम्युत्थानि
तवपविज्ञनोकिं विज्ञप्यते ॥२७॥ चनः पक्ष्मातेत्रैः सकलमपिसंधाय भवनं ॥ स्थितन्नन तस्थिद्धिःप्रमस्मपरतेत्रः
पशुपतिः ॥ पुनस्त्वत्तृविधादविलपुनसौख्याघटना ॥ स्वतंत्रं तेतेतेत्रं स्थितिनलमव्वातीत्यदिदं ॥२८॥ श्रिवःश्रा
किःकामःस्थितिनरीविःप्रीनकिरणः ॥ स्मेरोहंसःशाक्रस्तदत्तचपयामाबद्धवयः ॥ श्रमीहलेस्वाभिस्तिम
भिवबसानेस्तुघटिनो ॥ भजंनेवाणीस्तेनवज्जन निनामावयवतां ॥२९॥ समंयोनिं लक्ष्मी जितयमिदमा।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

के·का· ५

दौतवमनो॥ निधायैकेनित्येनिरवधिमहाभोगरसिका:॥ भजंतित्वांचिंतामणिगुणनिबद्धाक्षवलया:॥ शिवाग्नौजुह्वं

त:सुरभिघृतधाराहुतिशतै:॥ ३३॥ शरीरंत्वंशंभो:शशिमिहिरवक्षोरुहयुगं॥ तवात्मानंमन्येभगवतिभवात्मान

मनघं॥ अत:शेष:शेषीत्ययमुभयसाधारणतया॥ स्थित:संबंधोवांसमरसपरानंदपदयो:॥ ३४॥ मनस्त्वंव्यो

मत्वंमरुदसिमरुत्सारथिरसि॥ त्वमापस्त्वंभूमिस्त्वयिपरिणतायांनहिपरं॥ त्वमेवस्वात्मानंपरिणमयितुंविश्वव

पुषा॥ चिदानंदाकारंशिवयुवतिभावेनबिभृषे॥ ३५॥ तवाज्ञाचक्रस्थंतपनशशिकोटिद्युतिधरं॥ परंशंभुंवंदे

परिमिलितपार्श्वंपरचिता॥ यमाराध्यन्भक्त्यारविशशिशुचीनामविषये॥ निरालोकेलोकेनिवसतिसदालोक

भवने॥ ३६॥ विशुद्धौतेशुद्धस्फटिकविशदंव्योमजनकं॥ शिवंसेवेदेवीमपिशिवसमानव्यवसितां॥ ययो:कांत्या

यांत्या:शशिकिरणसारूप्यसरणि॥ विधूतांतर्ध्वांताविलसतिचकोरीवजगती॥ ३७॥ समुन्मीलत्संवित्कमलमक

रंदैकरसिकं॥ भजेहंसद्वंद्वंकिमपिमहतांमानसचरं॥ यदालापादष्टादशगुणितविद्यापरिणतिर्यदादत्तेदोषा

CC-0 Dharmartha Trust J&K: An eGangotri-Vaidika Bharata Initiative

गुणामविलमघः पयइव ॥ ३५ ॥ नदिव्यंतेशास्यातिमिव पवित्रं विश्वस्तवणाया ॥ स्तुवन्नानावत्नामवाणपवित्राहें अथ
नुधं ॥ नवस्या मं मे हं कमपिमणिः देवैकवाचणां ॥ निषेवेवर्षं मंदवित्रिमि ... नं त्रिभुवनं ॥ ३६ ॥ नवस्वाधिष्ठा
नेऽहं नवद्रुमधिष्ठाय निवृतं ॥ नमीडे मेवं तेऽननिमरुद्धीतांच समयां ॥ यद्वल्लोके लोकान्दहति महति क्रोध
कालिले ॥ दयाद्रीहरिलेखिशिखि उपचारं कवयति ॥ ३७ ॥ नवाधावेमहलेमद्रुसमयया लास्यपवया ॥ नवात्मानं नंव
देनवसममहात्तांडवनं ॥ उभाभ्यामेनाभ्यामुभयविधिमहिस्पदयया ॥ मनाभ्यामभ्यां ज्ञदेजनक्कनक्त्री मऊ
गादिदं ॥ ३८ ॥ गानेमौलिक्वंगगनमणिभिः सांद्रघटितं ॥ किरीटं तेदृष्टं महिमनिचितं कीर्तयति कः ॥ नमीडेय
छायास्तुवणाघावलेचंद्रधाकलं ॥ धनुःसोनासीदं किंचिदमितनवभातिघिवाणां ॥ ३९ ॥ स्तुवोदध्वांतं नक्तलिनद
लिवेदीवदवनं ॥ बवेलिबंधस्वदणाचिकुरनिकुरुंबंतवशिवे ॥ वदीयेसोरभ्यं महहज्ञमधपलं ... मनस्मो ॥ वसंत्यस्मि
न्नन्येबलमघनवाटीविटपिनां ॥ ४० ॥ कदंबीसिंदूरंघबलकवरीभावतिमिरं ॥ विधातुर्दैवंदीप्तनमिवनवीनार्क

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सौं· ५

किरणं ॥ तनोतु क्षेमं नस्तव वदनसौंदर्यलहरी ॥ परीवाहः स्रोतःसरणिरिव सीमंतसरणिः ॥ ४४ ॥ अरालैः स्वा-
भाव्यादलिकलभसश्रीभिरलकैः ॥ परीतं ते वक्त्रं परिहसति पंकेरुहरुचिं ॥ दरस्मेरे यस्मिन् दशनरुचिकिंजल्क-
रुचिरे ॥ सुगंधौ माद्यंति स्मरदहनचक्षुर्मधुलिहः ॥ ४५ ॥ ललाटं लावण्यद्युतिविमलमाभाति तव यद्द्वितीयं
तन्मन्ये मुकुटघटितं चंद्रशकलं ॥ विपर्यासन्यासादुभयमपि संभूय च मिथः ॥ सुधालेपस्यूतिः परिणमति
राकाहिमकरः ॥ ४६ ॥ भ्रुवौ भुग्ने किंचिद्भुवनभयभंगव्यसनिनि ॥ त्वदीये नेत्राभ्यां मधुकररुचिभ्यां धृतगु-
णं ॥ धनुर्मन्ये सव्येतरकरगृहीतं रतिपतेः ॥ प्रकोष्ठे मुष्टौ च स्थगयति निगूढांतरमिदं ॥ ४७ ॥ अहः सूते स-
व्यं तव नयनमर्कात्मकतया ॥ त्रियामां वामं ते सृजति रजनीनायकतया ॥ तृतीया ते दृष्टिर्दरदलितहेमांबुज-
रुचिः ॥ समाधत्ते संध्यां दिवसनिशयोरंतरचरीं ॥ ४८ ॥ विशाला कल्याणी स्फुटरुचिरयोध्या कुवलयैः ॥
कृपाधाराधारा किमपि मधुराभोगवतिका ॥ अवंती दृष्टिस्ते बहुनगरविस्तारविजया ॥ ध्रुवं तत्तन्नामव्यव-

उं· ५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

हरणयोग्या विजयते ॥ ४९ ॥ कवीनां संदर्भस्तवकमकरंदैकरसिकं । कटाक्षव्याक्षेपभ्रमरकलभौ कर्णयुगलं ॥
अमुंचंतौ दृष्ट्वा तव नवरसास्वादतरलौ ॥ असूयासंसर्गादलिकनयनं किंचिदरुणं ॥ ५० ॥ शिवे शृंगारार्द्रा त
दितरजने कुत्सनपरा ॥ सरोषा गंगायां गिरिशचरिते विस्मयवती ॥ हराहिभ्यो भीता सरसिरुहसौभाग्य
जननी ॥ सखीषु स्मेरा ते मयि जननि दृष्टिः सकरुणा ॥ ५१ ॥ गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती ॥ पुरां
भेत्तुश्चित्तप्रशमरसविद्रावणफले ॥ इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके ॥ तवाकर्णाकृष्टस्मरशरवि
लासं कलयतः ॥ ५२ ॥ विभक्तत्रैवर्ण्यं व्यतिकरितलीलांजनतया ॥ विभाति त्वन्नेत्रत्रितयमिदमीशानद
यिते ॥ पुनः स्रष्टुं देवान् द्रुहिणहरिरुद्रानुपरतान् ॥ रजः सत्त्वं बिभ्रत्तम इति गुणानां त्रयमिदं ॥ ५३ ॥
पवित्रीकर्तुं नः पशुपतिपराधीनहृदये ॥ दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः ॥ नदः शोणो गंगा
तपनतनयेति ध्रुवममुं ॥ त्रयाणां तीर्थानामुपनयसि संभेदमनघं ॥ ५४ ॥ तवापर्णे कर्णेजपनयनपै

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सौं° ९

स्तवचकितं ॥ निलीयंते तोये नियतमनिमेषाः शफरिकाः ॥ इयं च श्रीर्बद्धच्छदपुटकपाटं कुवलयं ॥ जहाति प्र
त्यूषे निशि च विघटय्य प्रविशति ॥ ५५ ॥ निमेषोन्मेषाभ्यां प्रलयमुदयं याति जगती ॥ तवेत्याहुः संतो धरणिध
रराजन्यतनये ॥ त्वदुन्मेषाज्जातं जगदिदमशेषं प्रलयतः ॥ परित्रातुं शंके परिहृतनिमेषास्तव दृशः ॥ ५६ ॥
दृशा द्राघीयस्या दरदलितनीलोत्पलरुचा ॥ दवीयांसं दीनं स्नपय कृपया मामपि शिवे ॥ अनेनायं धन्यो भव
ति न च ते हानिरियता ॥ वने वा हर्म्ये वा समकरनिपातो हिमकरः ॥ ५७ ॥ अरालं ते पालीयुगलमगराजन्यत
नये ॥ न केषामाधत्ते कुसुमशरकोदंडकुतुकं ॥ तिरश्चीनो यत्र श्रवणपथमुल्लंघ्य विलसन्नपांगव्यासंगो दिश
ति शरसंधानधिषणां ॥ ५८ ॥ स्फुरद्गंडाभोगप्रतिफलितताटंकयुगलं ॥ चतुश्चक्रं मन्ये तव मुखमिदं मन्मथर
थं ॥ यमारुह्य द्रुह्यत्यवनिरथमर्केंदुचरणं ॥ महावीरो मारः प्रमथपतये सज्जितवते ॥ ५९ ॥ सरस्वत्याः सूक्ती
रमृतलहरीकौशलहरीः ॥ पिबंत्याः शर्वाणि श्रवणचुलुकाभ्यामविरलं ॥ चमत्कारश्लाघाचलितशिरसः कुं

उ° ६

उल्लङ्गरागोरगणाक्यैस्तोत्रे = प्रतिवचनमाचष्ट इव ते ॥ ६० ॥ ग्रैवेनाग्रागवंशमन्द्रहिनगिरिविवंशाध्वजपटि ॥ त्वदीयोनेदीय = फ

लतफलमस्माकमुचितं ॥ वहन्वेतस्तिका = शिशिरितवनिःश्यामघटिता = ॥ तमग्घायत्ताशाव हिरण्यचक्रकाम

णिधर = ॥ ६१ ॥ प्रकृत्यारक्तायास्तवसुदति दन्तच्छदरुचे ॥ र्वदाकीसाहश्यंकथयतुकियद्विद्रुमलता ॥ नबिंबंवदि

बंबप्रतिफललनरागादरुणितं ॥ तुलामध्यारोढुंकथमिवविलज्जेतकलया ॥ ६२ ॥ स्मितज्योत्स्नाजालंतववद

नचंद्रस्यपिबतां ॥ चकोराणामासीदतिरसतयाचंचुजडिमा ॥ अतस्तेशीतांशोरमृतलहरीमम्लरुचयः ॥ पिबंति

स्वच्छंदंनिशिनिशिभृशंकांजिकधिया ॥ ६३ ॥ अविश्रांतंपत्युर्गुणगणकथाम्रेडनजपा ॥ जपापुष्पच्छायातव

जननिजिह्वाविजयते ॥ यदग्रासीनायाः = स्फटिकदृषदच्छच्छविमयी ॥ सरस्वत्यामूर्तिः = परिणमतिमाणिक्य

वपुषा ॥ ६४ ॥ रणेजित्वादैत्यानपहृतशिरस्त्रैः = कवचिभिः ॥ निवृत्तैश्चण्डांशत्रिपुरहरनिर्माल्यविमुखैः = ॥

विशाखेन्द्रोपेन्द्रैः = शशिविशदकर्पूरशकला ॥ विलीयंतेमातस्तववदनताम्बूलकवलाः = ॥ ६५ ॥ विपंच्यागा।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सौं-

7

यंती विविधमवदानं पशुपते ॥ त्वयारब्धे वक्तुं चलितशिरसा साधुवचने ॥ तदीयैर्माधुर्यैरपलपिततंत्रीकल
रवां ॥ निजां वीणां वाणी निचुलयति चोलेन निभृतं ॥ ६६ ॥ कराग्रेणास्पृष्टं तुहिनगिरिणा वत्सलतया ॥
गिरीशेनोदस्तं मुहुरधरपानाकुलतया ॥ करग्राह्यं शंभोर्मुखमुकुरवृंतं गिरिसुते ॥ कथंकारं ब्रूमस्तव चि
बुकमौपम्यरहितं ॥ ६७ ॥ भुजाश्लेषान्नित्यं पुरदमयितुः कंटकवती ॥ तव ग्रीवा धत्ते मुखकमलनालश्रिय
मियं ॥ स्वतः श्वेता कालागुरुबहलजंबालमलिना ॥ मृणालीलालित्यं वहति यदधो हारलतिका ॥ ६८ ॥
गले रेखास्तिस्रो गतिगमकगीतैकनिपुणे ॥ विवाहव्यानद्धत्रिगुणगणसंख्याः प्रतिभुवं ॥ विराजंते नाना
विधमधुररागाकरभुवां ॥ त्रयाणां ग्रामाणां स्थितिनियमसीमान इव ते ॥ ६९ ॥ मृणालीमृद्वीनां तव भु
जलतानां चतसृणां ॥ चतुर्भिः सौंदर्यं सरसिजभवः स्तौति वदनैः ॥ नखेभ्यः संत्रस्यन् प्रथममथनादं
धकरिपोश्चतुर्णां शीर्षाणां सममभयहस्तार्पणधिया ॥ ७० ॥ नखानामुद्योतैर्नवनलिनरागं विहसतां

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कराणां ते कांतिं कथय कथयामः कथममी ॥ कदाचिद्वा साम्यं भजतु कलया हंत कमलं ॥ यदि क्रीडल्लक्ष्मीच
रणतललाक्षारसचणं ॥ ७१ ॥ समं देवि स्कंदद्विपवदनपीतं स्तनयुगं ॥ तवेदं नः खेदं हरतु सततं प्रस्नुत
मुखं ॥ यदालोक्याशंकाकुलितहृदयो हासजनकः ॥ स्वकुंभौ हेरंबः परिमृशति हस्तेन झटिति ॥ ७२ ॥
अमू ते वक्षोजावमृतरसमाणिक्यकलशौ ॥ न संदेहस्पंदो नगपतिपताके मनसि नः ॥ पिबंतौ तौ यस्मा
दविदितवधूसंगमरसौ ॥ कुमारावद्यापि द्विरदवदनक्रौंचदलनौ ॥ ७३ ॥ वहत्यंब स्तंबेरमवदनकुंभ
प्रकृतिभिः ॥ समारब्धां मुक्तामणिभिरमलां हारलतिकां ॥ कुचाभोगो बिंबाधररुचिभिरंतः शबलि
तां ॥ प्रतापव्यामिश्रां पुरविजयिनः कीर्तिमिव ते ॥ ७४ ॥ कुचौ सद्यः स्विद्यत्तटघटितकूर्पासभिदुरौ ॥
कषंतौ दोर्मूले कनककलशाभौ कलयता ॥ तव त्रातुं भंगादलमिति विलग्नं तनुभुवा ॥ त्रिधा नद्धं देवि
त्रिवलि लवलीवल्लिभिरिव ॥ ७५ ॥ तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः ॥ पयः पारावारः परिव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मे॰ ८

8

दतिमावमवतइव ॥ दयावत्पादत्तंद्रविडशिशुरास्वाद्यतवयत्कवीनांप्रौढानामजनिकमनीयःकवयिता ॥ ७६ ॥ हर

क्रोधज्वालावलिभिरवलीढेनवपुषा ॥ गभीरेतेनाभीसरसिकृतसंगोमनसिजः ॥ समुत्तस्थौतस्मादचलतन

येधूमलतिका ॥ जनस्तांजानीतेजननितवरोमावलिरिति ॥ ७७ ॥ यदेतत्कालिंदीतनुतरतरंगाकृतिशिवे ॥

कृशेमध्येकिंचिज्जननितवयद्भातिसुधियां ॥ विमर्दादन्योन्यंकुचकलशयोरंतरगतं ॥ तनूभूतंव्योमप्रविश

दिवनाभिंकुहरिणीं ॥ ७८ ॥ स्थिरोगंगावर्तस्तनमुकुलरोमावलिलता ॥ कलावालंकुंडंकुसुमशरतेजोहुत

भुजः ॥ रतेर्लीलागारंकिमपितवनाभीतिगिरिजे ॥ बिलद्वारंसिद्धेर्गिरिशनयनानांविजयते ॥ ७९ ॥ निसर्ग

क्षीणस्यस्तनतटभरेणक्लमजुषो ॥ नमन्मूर्तेर्नारीतिलकशनकैस्त्रुट्यतइव ॥ चिरंतेमध्यस्यत्रुटिततटिनीती

रतरुणा ॥ समावस्थास्थेम्नोभवतुकुशलंशैलतनये ॥ ८० ॥ गुरुत्वंविस्तारंक्षितिधरपतिःपार्वतिनिजां ॥ नि

तंबादाछिद्यत्वयिहरणरूपेणनिदधे ॥ अतस्तेविस्तीर्णोगुरुरयमशेषांवसुमतीं ॥ नितंबप्राग्भारःस्थगयति

हिं॰ ८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

लघुत्वेनयतिच ॥ ८१ ॥ करीन्द्राणांशुण्डाः कनककदलीकाण्डपटली ॥ उभाभ्यामूरुभ्यामुभयमपिनिर्जित्यभवती
सुवृत्ताभ्यांपत्युःप्रणतिकठिनाभ्यांगिरिसुते ॥ विधिज्ञेजानुभ्यांविबुधकरिकुंभद्वयमपि ॥ ८२ ॥ पराजेतुंरुद्रं
द्विगुणशरगर्भौगिरिसुते ॥ निषंगौजंघेतेविषमविशिखोबाढमकृत ॥ यदग्रेदृश्यंतेदशशरफलाःपाद
युगली ॥ नखाग्रच्छद्मानःसुरमुकुटशाणैकनिशिताः ॥ ८३ ॥ श्रुतीनांमूर्द्धानोदधतितवयौशेखरतया
ममाप्येतौमातःशिरसिदययाधेहिचरणौ ॥ ययोःपाद्यंपाथःपशुपतिजटाजूटतटिनी ॥ ययोर्लाक्षाल
क्ष्मीररुणहरिचूडामणिरुचिः ॥ ८४ ॥ हिमानीहंतव्यंहिमगिरिनिवासैकचतुरौ ॥ निशायांनिद्राणंनिशि
चरमभागेनविशदौ ॥ वरंलक्ष्मीपात्रंश्रियमपिसृजंतौसमयिनां ॥ सरोजंत्वत्पादौजननिजयतश्चित्रमिहकिं ॥ ८५ ॥
नमोवाकंब्रूमोनयनरमणीयायपदयो ॥ स्तवास्मैद्वंद्वायस्फुटरुचिरसालक्तकवते ॥ असूयत्यत्यंतंयदभि
हननायस्पृहयते ॥ पशूनामीशानःप्रमदवनकंकेलितरवे ॥ ८६ ॥ मृषाकृत्वागोत्रस्खलनमथवैलक्ष्यनमि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सौं॰ ४ दं ॥ ललाटे भर्तारं चरणयुगले नाडयति ते ॥ चिरादंतःशल्यं दहनकृतमुन्मीलितवता ॥ तुलाकोटिक्वाणैः किलिकिलि
9 तमीशानरिपुणा ॥ ८७ ॥ पदं ते कीर्तीनां प्रपदमपदं देवि विपदां ॥ कथं नीतं सद्भिः कठिनकमठीकर्परतुलां ॥ कथं वा बा
हुभ्यामुपयमनकाले पुरभिदा ॥ यदादाय न्यस्तं दृषदि दयमानेन मनसा ॥ ८८ ॥ नखैर्नाकस्त्रीणां करकमलसंको
चशशिभि ॥ तरूणां दिव्यानां हसत इव ते चंडि चरणौ ॥ फलानि स्वःस्थेभ्यः किसलयकराग्रेण ददतां ॥ दरिद्रेभ्यो भ
द्रां श्रियमनिशमह्नाय ददतौ ॥ ८९ ॥ कदा काले मातः कथय कलितालक्तकरसं ॥ पिबेयं विद्यार्थी तव चरणनि
र्णेजनजलं ॥ प्रकृत्या मूकानामपि च कविताकारणतया ॥ यदा धत्ते वाणीमुखकमलतांबूलरसतां ॥ ९० ॥ पद
न्यासक्रीडापरिचयमिवारब्धुमनसः ॥ स्खलंतस्ते खेलं भवनकलहंसा न जहति ॥ अतस्तेषां शिक्षां सुभगमणिमं
जीररणितं ॥ च्छलादाचक्षाणं चरणयुगले चारुचरिते ॥ ९१ ॥ अराला केशेषु प्रकृतिसरला मंदहसिते ॥ शिरीषाभा
चित्ते दृषदुपलशोभा कुचतटे ॥ भृशं तन्वी मध्ये पृथुरुरसिजारोहविषये ॥ जगत्त्रातुं शंभोर्जयति करुणा का श्री ४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

चिदकृत्या ॥४२॥ समाधीतः पश्यां महिमाम ऊर्ध्वं नामेव ब्रह्मणो ॥ भयादस्याद्विमध्यात्ममिनकिरणाश्रेणिमम्मलां ॥ व्यातिव
मर्जां प्रति फलति विश्रांत विकचं ॥ मिशाने कंचेंड़ं निज हृदय पंकेरुह भवः ॥४३॥ भुजापातेर्वंतः पुरमसित नव च्युत
णायो ॥ सपर्यामर्यादा तहणा कृष्णा नाम महलभा ॥ न ध्याप्येते नीताभा न भवेम स्वामित्रि मनवला ॥ त्वबद्भो
पोत स्थिति भिवणा मार्गाभिर्भवमहा ॥४४॥ कल त्रैवेधा त्रैकतिकतिभजं तेन कवयः ॥ त्रियो देवा कोवा न भ
वति पतिः के वपि धनैः ॥ महादेवं हित्वा नवसति सतीनाम चरमे ॥ भुजावाभ्यामालेगः भुजबलकलो बुष्प हल
भः ॥४५॥ गतग्रेमंच त्वं कुहिनाद्रिसुतेष्वर भवतः ॥ शिवः स्वकृष्णा या यदितकपटप्रक्षद पठः ॥ त्वदीयानं
भान्तां प्रति फलन लाभारुणातया ॥ याधीर्धी र्छंगायो बसइव हर्षां दोषिध क्रांतकं ॥४६॥ कलंकः कमलबीबजिनि
कर विंबं जलमयं ॥ कलाभिः स्फुहीत सवकात कबंडनि विडितं ॥ अतल्लकोगेन प्रतिदिनमिदं विभ ऊर्ध्वं ॥ वि
धिर्भूयो भूयो निविड्यति नूनं न भवहृते ॥४७॥ स्वदेहो कृतामिर्द्धि णाभिर्मणा यामि भस्मितो ॥ निवेवेनित्ये

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सौ॰
१०

10

त्वामहमितिसदाभावयतियः॥ किमाश्चर्यंतस्यत्रिनयनसमृद्धिंतृणयतो॥ महासंवर्त्ताग्निर्विरचयतिनीराजन
विधिं॥ ९८॥ समुद्भूतस्थूलस्तनभरमुरश्चारुहसितं॥ कटाक्षेकंदर्प्पाःकतिचनकदंबद्युतिवपुः॥ हरस्य
त्वद्भ्रांतिंमनसिजनयंतःस्मविमलाः॥ भवत्यायेभक्ताःपरिणतिरमीषामियमुमे॥ ९९॥ गिरामाहुर्देवींद्रुहिण
गृहिणीमागमविदो॥ हरेःपत्नींपद्मांहरसहचरीमद्रितनयां॥ तुरीयाकापित्वंदुरधिगमनिःसीममहि
मा॥ महामायेविश्वंभ्रमयसिपरब्रह्ममहिषी॥ १००॥ सरस्वत्यालक्ष्म्याविधिहरसपत्नोविहरते॥ रतेः
पातिव्रत्यंशिथिलयतिरम्येणवपुषा॥ चिरंजीवन्नेवक्षपितपशुपाशव्यतिकरः॥ परानंदाभिख्यंरसयति
रसंत्वद्भजनवान्॥ १०१॥ निधेनित्यस्मेरेनिरवधिगुणेनीतिनिपुणे॥ निराघातज्ञानेनियतपरचित्तैकनि
लये॥ नियत्यानिर्मुक्तेनिखिलनिगमांतस्तुतिपदे॥ निरातंकेनित्येनिगमयममापिस्तुतिमिमां॥ १०२॥ प्र
दीपज्वालाभिर्दिवसकरनीराजनविधिः॥ सुधासूतेश्चंद्रोपलजललवैरर्घ्यरचना॥ स्वकीयैरंभोभिःस

सौ॰
१०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ६२७–घ.

सौं. ११ लिलनिधिसौहित्यकरणं। त्वदीयाभिर्वाग्भिस्तवजननिवाचांस्तुतिरियम्॥१०३॥इतिश्रीपरमहंसपरिव्रा

जकाचार्यविरचितंश्रीमच्छंकराचार्यविरचितंसौंदर्यलहरीस्तोत्रंसंपूर्णम्॥ समाप्तम्॥ शुभम्॥

॥॥॥॥॥ श्रीजगदंबायैनमः॥ श्रीपरमशिवायैनमः॥ ॥ ॥॥ ॥ ॥

उ. ११

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative